Topic. 12 षष्ठी विभक्ति — १

षष्ठी । राज्ञः पुरुषो राजपुरुषः ।
षष्ठ्यन्त सुबन्त का सुबन्त के साथ समास होता है और उस समास को 'तत्पुरुष' कहते हैं । उदाहरण के लिए (राज्ञः पुरुषः (राजा का आदमी) इस विग्रह में षष्ठ्यन्त राज्ञः का सुबन्त 'पुरुषः' के साथ समास होकर 'राजपुरुषः' रूप बनता है ।

याजकादिभिश्च । एभिः षष्ठ्यन्तं समस्यते । 'तृजकाभ्यां कर्तरि' इत्यस्य प्रतिप्रसवोऽयम् । ब्राह्मणयाजकः । देवपूजकः । गुणात्तरेण तरलोपश्चेति वक्तव्यम् । (वा) तरबन्तं यद् गुणवाचि तेन सह समासस्तर-लोपश्च । 'न निर्धारणे इति' 'पूरणगुण इति च' निषेधस्य प्रतिप्रसवोऽयम् । सर्वेषां श्वेततरः सर्वश्वेतः । सर्वेषां महत्तरः सर्वमहान् । 'कृद्योगा च षष्ठी समस्यत इति वाच्यम्' इध्मस्य व्रश्चन इध्मव्रश्चनः

न निर्धारणे । निर्धारणे या षष्ठी सा न समस्यते । नृणां द्विजः श्रेष्ठः । प्रतिपद-विधाना षष्ठी न समस्यत इति वाच्यम् ' (वा०) सर्पिषो ज्ञानम् ।

पूरणगुणसुहितार्थसदव्ययतव्य
समानाधिकरणेन पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। पूरणे - सतां षष्ठः। गुणे - काकस्य कार्ष्ण्यम्, ब्राह्मणस्य शुक्लाः। यदा प्रकरणादिना दन्ता इति विशेष्यं स्यात् तदेदमुदाहरणम्। अनित्योऽयं गुणेन निषेधः, तदशिष्यं संज्ञाप्रमाणत्वात् इत्यादिनिर्देशात्। तेन अर्थगौरवम्, बुद्धिमान्द्यम् इत्यादि सिद्धम्। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव। स्वरे विशेषः। सत् - द्विजस्य कुर्वन्, कुर्वाणो वा, किङ्कर इत्यर्थः। अव्ययम् - ब्राह्मणस्य कृत्वा। पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते। तेन तदुपरि इत्यादि सिद्धमिति रक्षितः। तव्यः - ब्राह्मणस्य कर्तव्यम्। तव्यता तु भवत्येव, स्वकर्तव्यम्। स्वरे भेदः। समानाधिकरणेन - तक्षकस्य सर्पस्य। विशेषणसमासस्यापि बहुलग्रहणान्न। गोर्धेनोः इत्यादिषु। पोटायुवति-इत्यादीनां विभक्त्यन्तरे चरितार्थत्वात्। सत् - द्विजस्य कुर्वन्, कुर्वाणो वा, किङ्कर इत्यर्थः। अव्ययम् - ब्राह्मणस्य कृत्वा।

पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते ।
तेन तदुपरि इत्यादि सिद्धमिति रक्षितः
तन्न: - ब्राह्मणस्य कर्तव्यम् । अन्यथा
तु भवत्येव, स्वरकर्तव्यम् । स्वरे भेदः ।
समाने समानाधिकरणेन - तक्षकस्य
सर्पस्य । विशेषणसमासस्त्विह बहुलग्रहणा-
न्न । 'गोधेनोः' इत्यादिषु । पोटायुवति ।
इत्यादीनां विभक्त्यन्तरे चारितार्थ्यानां
परत्वाद्बाधकः षष्ठीसमासः प्राप्तः,
सोऽप्यनेन वार्यते ।

क्तेन च पूजायाम् । मतिबुद्धि-
इति सूत्रेण विहितो यः क्तस्तदन्तेन
षष्ठी न समस्यते । राज्ञो मतो बुद्धः
पूजितो वा राजपूजित इत्यादौ तु
भूते क्तान्तेन सह तृतीयान्तस्य समासः
अधिकरणवाचिना च । क्तेन षष्ठी न
समस्यते । इदमेषामासितं शयितं भुक्तं वा